श्री भुवनेश्वरी हृदयं

श्री भुवनेश्वरी हृदयं

श्रीदेव्युवाच |
भगवन् ब्रूहि तत् स्तोत्रं सर्वकामप्रसाधनं |
यस्य श्रवणमात्रेण नान्यच्छ्रोतव्यमिष्यते || 1 ||

यदि मेऽनुग्रहः कार्यः प्रीतिश्चापि ममोपरि |
तदिदं कथय ब्रह्मन् विमलं यन्महीतले || 2 ||

ईश्वर उवाच |
शृणु देवि प्रवक्ष्यामि सर्वकामप्रसाधनं |
हृदयं भुवनेश्वर्याः स्तोत्रमस्ति यशोदयं || 3 ||

ॐ अस्य श्रीभुवनेश्वरीहृदयस्तोत्रमंत्रस्य शक्तिः ऋषिः – गायत्री छंदः – श्रीभुवनेश्वरी देवता – हकारो बीजं – ईकारश्शक्तिः – रेफः कीलकं – सकल मनोवांछितसिद्ध्यर्थे जपे विनियोगः ||

करन्यासः ||
ॐ ह्रीं अंगुष्ठाभ्यां नमः |
ॐ श्रीं तर्जनीभ्यां नमः |
ॐ ऐं मध्यमाभ्यां नमः |
ॐ ह्रीं अनामिकाभ्यां नमः |
ॐ श्रीं कनिष्ठिकाभ्यां नमः |
ॐ ऐं करतलकरपृष्ठाभ्यां नमः |

अंगन्यासः ||
ॐ ह्रीं हृदयाय नमः |
ॐ श्रीं शिरसे स्वाहा |
ॐ ऐं शिखायै वषट् |
ॐ ह्रीं कवचाय हुं |
ॐ श्रीं नेत्रत्रयाय वौषट् |
ॐ ऐं अस्त्राय फट् |

ध्यानं ||

ध्यायेद्ब्रह्मादिकानां कृतजनिजननीं योगिनीं योगयोनिं
देवानां जीवनायोज्ज्वलितजयपरज्योतिरुग्रांगधात्रीं |
शंखं चक्रं च बाणं धनुरपि दधतीं दोश्चतुष्कांबुजातौ
मायामाद्यां विशिष्टां भव भव भुवनां भूभवा भारभूमिं || 4 ||

यदाज्ञया यो जगदाद्यशेषं
सृजत्यजः श्रीपतिरौरसं वा |
बिभर्ति संहंति भवस्तदंते
भजामहे श्रीभुवनेश्वरीं तां || 5 ||

जगज्जनानंदकरीं जयाख्यां
यशस्विनीं यंत्रसुयज्ञयोनिं |
जितामितामित्रकृतप्रपंचां
भजामहे श्रीभुवनेश्वरीं तां || 6 ||

हरौ प्रसुप्ते भुवनत्रयांते-
प्यनारतन्नाभिजपद्मजन्मा |
विधिस्ततोऽंधे विदधार यत्पदं
भजामहे श्रीभुवनेश्वरीं तां || 7 ||

न विद्यते क्वापि तु जन्म यस्या
न वा स्थितिः सांततिकीह यस्याः |
न वा निरोधेऽखिलकर्म यस्या
भजामहे श्रीभुवनेश्वरीं तां || 8 ||

कटाक्षमोक्षाचरणोग्रवित्ता
निवेशितार्णा करुणार्द्रचित्ता |
सुभक्तयेराति समीप्सितं या
भजामहे श्रीभुवनेश्वरीं तां || 9 ||

यतो जगज्जन्म बभूव योने-
स्तदेव मध्ये प्रतिपाति यां वा |
तदत्ति यांतेऽखिलमुग्रकाळि
भजामहे श्रीभुवनेश्वरीं तां || 10 ||

सुषुप्तिकाले जनमध्ययंत्या
यया जनः स्वप्नमवैति किंचित् |
प्रबुध्यते जाग्रति जीव एष
भजामहे श्रीभुवनेश्वरीं तां || 11 ||

दयास्फुरत्कोरकटाक्षलाभा-
न्नकेत्र यस्याः प्रभवंति सिद्धाः |
कवित्वमीशित्वमपि स्वतंत्रा
भजामहे श्रीभुवनेश्वरीं तां || 12 ||

लसन्मुखांभोरुहमुत्स्फुरंतं
हृदि प्रणिध्याय दिशि स्फुरंतः |
यस्याः कृपार्द्रं प्रविकासयंति
भजामहे श्रीभुवनेश्वरीं तां || 13 ||

यदानुरागानुगताळिचित्रा-
श्चिरंतनप्रेमपरिप्लुतांगाः |
सुनिर्भयास्संति प्रमुद्य यस्याः
भजामहे श्रीभुवनेश्वरीं तां || 14 ||

हरिर्विरंचिर्हर ईशितारः
पुरोऽवतिष्ठंति परंनतांगाः |
यस्यास्समिच्छंति सदानुकूल्यं
भजामहे श्रीभुवनेश्वरीं तां || 15 ||

मनुं यदीयं हरमग्निसंस्थं
ततश्च वामश्रुतिचंद्रसक्तं |
जपंति ये स्युस्सुरवंदितास्ते
भजामहे श्रीभुवनेश्वरीं तां || 16 ||

प्रसीदतु प्रेमरसार्द्रचित्ता
सदा हि सा श्रीभुवनेश्वरी मे |
कृपाकटाक्षेण कुबेरकल्पा
भवंति यस्याः पदभक्तिभाजः || 17 ||

मुदा सुपाठ्यं भुवनेश्वरीयं
सदा सतां स्तोत्रमिदं सुसेव्यं |
सुखप्रदं स्यात्कलिकल्मषघ्नं
सुशृण्वतां संपठतां प्रशस्यं || 18 ||

एतत्तु हृदयं स्तोत्रं पठेद्यस्तु समाहितः |
भवेत्तस्येष्टदा देवी प्रसन्ना भुवनेश्वरी || 19 ||

ददाति धनमायुष्यं पुण्यं पुण्यमतिं तथा |
नैष्ठिकीं देवभक्तिं च गुरुभक्तिं विशेषतः || 20 ||

पूर्णिमायां चतुर्दश्यां कुजवारे विशेषतः |
पठनीयमिदं स्तोत्रं देवसद्मनि यत्नतः || 21 ||

यत्रकुत्रापि पाठेन स्तोत्रस्यास्य फलं भवेत् |
सर्वस्थानेषु देवेश्याः पूतदेहः सदा पठेत् || 22 ||

इति नीलसरस्वतीतंत्रे श्री भुवनेश्वरीपटले श्रीदेवीश्वरसंवादे श्रीभुवनेश्वरी हृदयस्तोत्रं संपूर्णं ||